Postal Regd.No. GAMC- 1553/2019-2021
ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १६ अङ्क : १८५
ओक्टोबर - २०२१

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

✍ सतीशः गज्जर्

### सरस्वत्याः पुत्री

संस्कृतभाषया अस्मभ्यं केचन मनोहारिणः शब्दाः दत्ताः । तेषु एकतमः अस्ति – 'बहुश्रुतः ।' अस्माकं स्वाभाविकी धारणा वर्तते यत् यः संस्कृतज्ञः (शास्त्रज्ञः वा) अस्ति सः बहुश्रुतः । परन्तु तथा न स्यात् । सर्वोऽपि विद्यावान् मनुष्यः बहुश्रुतः एव । एवं व्याप्तिं न करिष्यामः चेत् सरस्वती कुण्ठिता भविष्यति । वस्तुतः संस्कृतवाङ्मयं नितरां समृद्धं वर्तते, तत्र सन्देहः नास्ति । परन्तु तदनन्तरम् इतरभाषासु सृष्टं साहित्यम् उपेक्षणीयं नास्ति । संस्कृते स्निग्धः मनुष्यः एतत् तत्त्वतः जानीयात् ।

मम जन्म गुर्जरेषु अभवत् । भवतु नाम मम पुत्रस्य भाषा संस्कृतम्, परन्तु मम भाषा तु गुर्जरी एव । अहं संस्कृतस्य अध्ययनं प्रायः गुर्जरभाषया करोमि । परिणामतः, संस्कृतं प्रति मम महान् आदरः अस्ति, तथापि गुर्जरीं प्रति उपेक्षा नास्ति । केचन दुराग्रहलिप्तमतयः मनुष्याः तर्कं कुर्वन्ति यत् सर्वासां प्रादेशिकभाषाणां जननी संस्कृतभाषा । अतः अध्ययनं संस्कृतभाषायाः एव वरम् । तेषां तर्कः अपूर्वः अस्ति, तथापि अपूर्णः अस्ति । संस्कृतभाषा जननी अस्ति । इतरभाषाः च तस्याः पुत्र्यः सन्ति । अतः एव मातरं (संस्कृतं) प्रति यावान् आदरः वर्तते, तावान् एव आदरः तस्याः पुत्रीः (प्रादेशिकभाषाः) प्रति अपि भवेत् । मातुः सर्वे गुणाः पुत्रीषु अवतीर्णाः अपि सन्ति !

बहवः जनाः मया सह मिलन्ति । ते 'अयं जनः संस्कृतप्रियः' इति पूर्वतः अभिसन्धानं कृत्वा संवादं प्रारभन्ते । मह्यं तत् न रोचते । गुर्जरभाषा अपि मम रुधिरे वहति – इदानीम् अपि वहति । गुर्जरभाषां मूलात् उच्छिद्य अहं संस्कृतस्य अध्ययनं कर्तुं न इच्छामि । अन्ये सुज्ञाः विद्वांसः अपि न कुर्वन्ति । विद्वद्वर्यः वसन्तः भट्टः अत्र स्मृतिपथम् आयाति । सः विश्वप्रसिद्धः संस्कृतविद्वान् वर्तते, तथापि तस्य गुर्जरीं प्रति प्रीतिः अल्पा नास्ति । तेन विकृतिं प्रति गच्छन्तीं (अथवा नीयमानां) गुर्जरभाषां रक्षितुं प्रयत्नाः विहिताः । तथैव गुर्जरवाङ्मयस्य कवीनां विषये चिन्तयितुं शक्यते । महाकविः उमाशङ्करः जोशी संस्कृतम् अधीतवान् । तेन कृतः शाकुन्तलस्य 'समश्लोकी अनुवादः' प्रसिद्धः एव । धूमकेतोः प्रत्येकं वाक्ये संस्कृततत्त्वं प्रभाति । सः तु गुर्जरभाषायाः कालिदासः एव ।

तात्पर्यम् एतावत् एव यत् वयं 'वन्दे संस्कृतमातरम्' घोषयन्तः, सरस्वत्याः दयितां गुणवतीं पुत्रीं न विस्मरेम । एषः विचारः संस्कृतासक्तेभ्यः रोचेत वा न वा, सरस्वत्यै रोचिष्यते इति निश्चितम् ।

## धनिकनिर्धनयोः अर्थः



कस्मिंश्चित् ग्रामे धनगुप्तः नाम कश्चन वणिक् निवसति स्म । सः प्रभूतां सम्पत्तिं सम्पादितवान् आसीत् । वार्धक्ये पक्षवातेन पीडितः सः पश्चातापपूर्वकम् अचिन्तयत् – 'मया आजीवनं धनस्य सम्पादनार्थम् एव प्रयासाः कृताः । परोपकारार्थं मया किमपि न कृतम्' इति।

अतः सः पुत्रं श्रीगुप्तं स्वसमीपम् आहूय अवदत् – ''वत्स ! जीवने जनोपकारकम् एकम् अपि कार्यं मया न कृतम्। कस्यचिदपि दरिद्रस्य, असहायस्य वा साहाय्यं वापि न कृतम् । भवता अपि एवं न करणीयम् । जीवनार्थं यावत् आवश्यकं तावत् धनं पृथक्कृत्य रक्षित्वा अवशिष्टेन धनेन धर्मशालां निर्मातु'' इति। ततः अल्पे एव काले सः प्राणैः वियुक्तः जातः।

पितुः अन्त्यसंस्कारं यथाविधि कृतवान् श्रीगुप्तः वाणिज्ये निमग्नः जातः । तस्मिन् वर्षे निरीक्षातः अपि अधिकः लाभः प्राप्तः तेन। तदा तेन पितुः वचनं स्मृतम्।

सः अचिन्तयत् – 'एतस्मिन् वर्षे लाभः प्राप्तः । अग्रिमे वर्षे हानिः अपि सम्भवेत् कदाचित्। अतः अग्रिमे वर्षे अपि यदि लाभं प्राप्स्यते तर्हि धर्मशालानिर्माणं कारयिष्यामि। इदानीम् एव तदर्थं व्ययः हानये भवेत् कदाचित्' इति।

अनन्तरवर्षे अपि तेन द्विगुणितः लाभः प्राप्तः । तथापि तेन तृप्तिः न प्राप्ता। सः धर्मशालानिर्माणविचारम् अग्रे सारितवान्।

कदाचित् रात्रौ दीर्घकालपर्यन्तं श्रीगुप्तः आयव्ययादिकं लिखन् आसीत् । तत्समये कश्चित् शरीरे महतीं पीडाम् अनुभवन् वेदनामिश्रितं ध्वनिम् उत्पादयन् तस्य गृहस्य पुरतः उपविष्टवान् । श्रीगुप्तः वातायनात् दृष्टिं प्रसारितवान्। कश्चन अन्धः भिक्षुकः वेदनाम् अनुभवन् तस्य गृहस्य पुरतः उपविश्य स्वस्य भिक्षापात्रं हस्तेन स्पृष्ट्वा परिशीलयन् आसीत्।

अत्रान्तरे अपरः कश्चन भिक्षुकः खञ्जन् तत्र आगत्य अन्धस्य भिक्षुकस्य पार्श्वे उपविशन् अपृच्छत् – ''जीवन ! किमर्थं वेदनामिश्रितः ध्वनिः उत्पाद्यते ? किम् अभवत् भवतः ?'' इति।

तदा जीवनः पीडाम् अनुभवन् अवदत् – ''अये नारायण ! अहं तु अन्धः खलु ? प्रातः भिक्षायाचनावसरे कुत्रापि पादस्खलनं प्राप्य अपतम्। तस्मात् भिक्षार्थम् अटितुं न शक्तं मया। अतः अद्य भिक्षा कापि मया न प्राप्ता। अहो, दुःस्थितिः मम!'' इति।

नारायणः जीवनस्य पादं परीक्षितवान् । पादः स्फीततां गतः आसीत् । नारायणः स्वस्य स्यूततः भिक्षापात्रं निष्कासयन् – ''अहं भवतः पादस्य वेदनां तु अपनेतुं न शक्नोमि । किन्तु भवतः बुभुक्षाम् अवश्यम् उपशमयितुं शक्नोमि'' इति वदन् स्वस्य भिक्षापात्रं तस्य पुरतः स्थापितवान् ।

''भवता अपि किमपि खादितम्, उत सर्वं मह्यम् एव दीयमानम् अस्ति ?'' इति पृष्टवान् जीवनः ।

''यावत् अस्ति तत् द्विधा विभज्य अर्धभागः भवते दत्तः अस्ति मया । सन्तोषेण खादतु भवान्'' इति अवदत् नारायणः ।

वातायनस्य पार्श्वे स्थित्वा एतत्सर्वं पश्यन् आसीत् श्रीगुप्तः । तस्मिन् विवेकः उदितः । सः अचिन्तयत् – 'स्वस्य समीपे यावत् अस्ति तावत् विभज्य स्वीकुर्वन् एषः भिक्षुकः नारायणः एव धनिकः । कस्मैचिदपि किमपि दातुम् अशक्नुवन् जीवनः तु दरिद्रः । अहं धनवान् सन् अपि दरिद्रः इव जातः अस्मि' इति ।

एवं चिन्तितवान् श्रीगुप्तः द्वारम् उद्घाट्य तयोः भिक्षुकयोः कृते पूर्णोदरं भोजनं दत्त्वा शयनार्थं गृहस्य अन्तः व्यवस्थां कृतवान् । अनन्तरदिने जीवनस्य पादस्य चिकित्सां कारितवान् सः । धर्मशालानिर्माणकार्यस्य आरम्भः तस्मिन् एव दिने जातः ।

श्रीगुप्तः धनिकनिर्धनपदयोः अर्थं सम्यक् अवगतवान् आसीत् । अतः यथा धनं सम्पाद्यते स्म तथैव परोपकारार्थं तस्य विनियोगः अपि तेन कृतः ।

## नास्तिकस्य कोपः

शिवरामः निरीश्वरवादी । वाणिज्येन प्रभूतं धनं सम्पादितं तेन । गच्छता कालेन वार्धक्यं तेन प्राप्तम् । शरीरं दुर्बलं जातम् । एतदवसरे बान्धवाः केचन तम् उक्तवन्तः – ''इदानीं वा निरीश्वरवादः परित्यज्यताम् । देवभक्तिः मनसि ध्रियताम् । परलोके वा किञ्चित् सुखं प्राप्यताम्'' इति ।

सम्यक् चिन्तनात् शिवरामः अवगतवान् यत् तेषां वचने तथ्यम् अस्ति इति । अतः सः ''इह लोके तु सुखं भुक्तम् । यदि परलोकः कश्चन स्यात् तर्हि तत्रापि सुखं भवतु नाम'' इति उक्त्वा अर्चकस्य केशवस्य समीपं गतवान् ।

केशवः न हि सामान्यः अर्चकः । धार्मिकेषु आध्यात्मिकेषु च विषयेषु महत् पाण्डित्यम् आसीत् तस्य । यदा शिवरामः आगतः तदा सः देवालयस्य पुरतः उपविश्य ग्रन्थं परिशीलयन् आसीत् ।

शिवरामः तत्समीपम् आगत्य तं नमस्कृतवान् । ''मार्गभ्रंशात् तु अत्र न आगतं खलु ?'' इति अपृच्छत् केशवः । शिवरामः स्वस्य आगमनकारणम् अवदत् । तदा आश्चर्यम् अनुभवन् केशवः अपृच्छत् – ''एवम् ! यत् धनं सम्पादितं, यत् दातव्यं, तस्य सर्वस्य व्यवस्था कृता किम् ?'' इति ।

तदा शिवरामः कोपेन – ''समये असति अपि आध्यात्मिकं धार्मिकं च विषयं ज्ञातुम् अहं भवत्समीपम् आगतः । किन्तु भवान् वाणिज्यसम्बद्धम् एव मां पृच्छति । मम अमूल्यः समयः विनष्टः । धिक् भवन्तम्'' इति उक्त्वा ततः निर्गतवान् ।

## सत्सङ्गस्य फलम्

भारती पटेलः

कस्मिंश्चित् समये नारदमुनिः भगवतः समीपम् आगत्य तं प्रश्नं पृष्टवान् यत् – ''सत्सङ्गस्य किं फलम् ?'' इति।

''हे नारदमुने ! भवतः प्रश्नस्य उत्तरं नरके स्थितः कीटः भवते दास्यति'' इति। भगवान् अवदत्।

नारदमुनिः नरकं गतवान्। तत्र तेन कीटः दृष्टः। मुनिना सः पृष्टः यत् – ''हे कीट ! सत्सङ्गस्य किं फलम् ?'' मुनिं दृष्ट्वा कीटेन देहः त्यक्तः। मुनिना प्रश्नस्य उत्तरं न प्राप्तम्। अतः मुनिः पुनः भगवतः समीपं गत्वा तम् उक्तवान् यत् – ''अहं प्रश्नस्य उत्तरं न प्राप्तवान्।'' कीटः तु अम्रियत। अतः भवान् मह्यं प्रश्नस्य उत्तरं ददातु।

एतत् श्रुत्वा भगवान् उक्तवान् यत् – ''तस्मिन् नीडे शुकस्य नवजातः शिशुः अस्ति। तत्र गत्वा तं पृच्छतु। सः भवन्तं सत्सङ्गस्य फलं निर्देक्ष्यति इति।''

भगवतः आज्ञया उत्तरस्य आशया च सः नीडे स्थितं नवजातं शिशुं पृष्टवान् यत् – ''सत्सङ्गस्य किं फलम् ?'' शिशुः नारदमुनिं दृष्ट्वा शीघ्रं मृतः जातः। त्रस्तः नारदमुनिः मनसि अचिन्तयत्। किं सत्सङ्गस्य फलं मरणम् ? इति विचिन्त्य खिन्नः नारदमुनिः भगवतः समीपं पुनः आगतः। ''हे प्रभो ! मां कृपया सत्यं वदतु। यं यम् अहं पृच्छामि तस्य प्राणाः देहतः निर्गताः। अहं पापी अभवम्। अधुना अहं भवतः सूचनां न स्वीकरिष्यामि इति।''

एतत् श्रुत्वा भगवान् हासं हासं तम् उक्तवान् – ''कृपया उत्कण्ठितः न भवतु। सत्यं ज्ञातुम् इच्छति तर्हि तत्र नवजातस्य वत्सस्य समीपं गत्वा तं प्रश्नं पृच्छतु'' इति। नारदमुनिः तत्र गत्वा तस्य कर्णे प्रश्नं पृष्टवान् यत् सत्सङ्गस्य किं फलम् ? तत्र स्थितस्य प्रतीक्षां कुर्वतः नारदमुनेः पुरतः सः वत्सः अम्रियत। नारदमुनिः दुखितः अभवत्। भगवतः समीपं सः शीघ्रं धावन् आगतः। भगवान् श्रान्तं नारदमुनिम् अवदत् यत् – ''भवतः प्रश्नस्य उत्तरम् अधुना निश्चयेन प्राप्स्यति। एतस्य नगरस्य राज्ञः समीपं गच्छतु। इदानीमेव तस्य एकः पुत्रः जातः। भवान् राज्ञः प्रासादं गत्वा तत्पुत्रं प्रश्नं पृच्छतु।'' नारदमुनिः उक्तवान् – ''अद्यावधि यं यम् अहं पृष्टवान् सः मृतः जातः। यदि राज्ञः पुत्रः मरिष्यति तर्हि राजा माम् अपि मारयिष्यति। अहम् अधुना सत्सङ्गफलविषये ज्ञातुं न इच्छामि। अहं भवति विश्वासम् अपि न करोमि।''

नारदमुनिम् अनुनयन् भगवान् अब्रवीत् – ''सः राजपुत्रः भवन्तं सत्सङ्गफलं किम् इति निश्चयेन वदिष्यति। सः न मरिष्यति अपि। अतः भवान् तत्र गत्वा तं पृच्छतु इति।''

नारदमुनिः राजप्रासादं गत्वा राजपुत्रं प्रश्नं पृष्टवान्। राजपुत्रः सहासम् उक्तवान् – ''हे महामुने ! भवान् अधुना अपि सत्सङ्गस्य किं फलम् इति न ज्ञातवान् ? यदा भवान् मां पूर्वं प्रश्नं पृष्टवान् तदा अहं कीटः आसम्। भवतः दर्शनेन अहं शुकस्य देहं प्राप्तवान्। पुनः तत्र भवतः दर्शनेन अहं वत्सः अभवम्। तत्रापि भवतः दर्शनेन वत्सस्य शरीरं त्यक्त्वा अहं राजगृहे अजाये। भवादृशस्य साधोः दर्शनेन अहं क्रमशः उच्चतरां योनिं प्राप्तवान्। अत्रापि भवतः दर्शनेन मम जीवनं सार्थकम् अभवत्।''

एतत् श्रुत्वा प्रसन्नभूतः नारदमुनिः राज्ञे राजपुत्राय च आशीर्वादं दत्त्वा भगवतः समीपं गत्वा तम् उक्तवान् – ''भवतः लीलां कोऽपि ज्ञातुं न शक्नोति इति।''

# मासवार्ता

## आयोजितानि व्याख्यानानि



संस्कृतरसिकाः संस्कृतसाहित्यस्य शास्त्राणां च परिचयं प्राप्नुयुः इति विचार्य एकलव्य-संस्कृत-एकेडेमी, संस्कृतविद्याप्रतिष्ठानं चेरिटेबलट्रस्ट, अमदावाद-संस्कृत-एकेडेमी इत्येतेषां संयुक्तोपक्रमेण संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः आयोजनम् अभवत् । कार्यक्रमेऽस्मिन् सप्टेम्बरमासस्य १९ दिनाङ्के डॉ. चिन्तनः दवे 'संस्कृत में छंदो का स्वरूप' इति विषये, सप्टेम्बरमासस्य २३, २४, २५ दिनाङ्केषु डॉ. वसन्तकुमारः भट्टः 'ऋग्वेद के मन्त्रों का पदपाठ' इति विषये च मनोहरं व्याख्यानं प्रायच्छताम्। व्याख्यानानि श्रुत्वा संस्कृतरसिकाः सन्तुष्टाः आसन्।

## सम्पन्नः स्तोत्रपाठवर्गः

संस्कृतस्तोत्रं पठितुम् इच्छुकानां संस्कृतरसिकानां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन संस्कृतस्तोत्रपाठनाभ्यासक्रमः सञ्चाल्यते । अभ्यासक्रमेऽस्मिन् सप्टेम्बरमासस्य ७ दिनाङ्कात् आरभ्य ३० दिनाङ्कं यावत् शिवमहिम्नः स्तोत्रस्य अध्यापनम् अभवत्। श्रीऋषिपुरोहितः सुचारुतया छात्रान् शिवमहिम्नःस्तोत्रस्य उच्चारणं भावार्थं च अपाठयत्।

## सम्पन्नः श्रीमद्भगवद्गीतावर्गः




जुलाईमासस्य १ दिनाङ्कतः सप्टेम्बरमासस्य ०२ दिनाङ्कपर्यन्तम् एकलव्य-संस्कृत-एकेडेमीसंस्थानेन आयोजिते श्रीमद्भगवद्गीतायाः श्लोकोच्चारणवर्गे १६ छात्राः आन्तर्जालमाध्यमेन भगवद्गीतामाहात्म्यस्य प्रथमाध्यायस्य द्वितीयाध्यायस्य च श्लोकानाम् उच्चारणं पठितवन्तः । श्रीश्यामः पटेलः छात्रेभ्यः मार्गदर्शनं प्रायच्छत् । कार्यक्रमोऽयं सफलः ।

## कृपया हसन्तु

रमणः कारयानं प्रक्षालयन् आसीत्, तदा मोहनः तं दृष्ट्वा - "भोः रमण ! कारयानं प्रक्षालयन् अस्ति किम् ?"

रमणः - (कोपेन) न । कारयानाय जलं पाययन् अस्मि । कदाचित् गच्छता कालेन एतत् लोकयानं भवेत् ।

★ ★ ★ ★ ★

महिला - (वैद्यम् उद्दिश्य) अहं किं करवाणि येन मम शरीरभारः न्यूनः भवेत् ?

वैद्यः - भवती भवत्याः मुखं त्रिवारं वामतः त्रिवारं दक्षिणतः च भ्रामयतु । तेन भवत्याः भारः निश्चयेन न्यूनः भविष्यति ।

महिला - अहं मम मुखं कदा भ्रामयानि ?

वैद्यः - यदा कोऽपि किमपि खादितुं पृच्छेत् तदा ।

★ ★ ★ ★ ★

रमणः - (क्रीडाशिक्षकं प्रति) महोदय ! अहं पादकन्दुकं क्रीडितुम् इच्छामि ।

शिक्षकः - शोभनम् । क्रीडायाः आरम्भात् पूर्वं पादकन्दुकक्रीडाविषये ज्ञातुं भवतः कोऽपि प्रश्नः अस्ति तर्हि पृच्छतु ।

रमणः - 'गोलपोस्ट' इत्येतस्य जाले कति छिद्राणि भवन्ति ? शिक्षकः अद्यापि तानि गणयन् अस्ति ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः दैवेन देयमिति कापुरुषा वदन्ति ।**
**दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥**

**तात्पर्यम्** – उद्यमशीलान् लक्ष्मीः स्वयम् आश्रयति । सर्वं दैवेन एव अनुग्रहितव्यम् इति ये प्रतीक्षन्ते ते कापुरुषाः । दैवमेव नावलम्बयन् स्वयं परिश्रमः कर्तव्यः । परिश्रमेण अपि कदाचित् फलं यदि न लभ्येत तर्हि कः दोषः तत्र ?

**उपकारिषु यः साधुः साधुत्वे तस्य को गुणः ।**
**अपकारिषु यः साधुः स साधुः सद्भिरुच्यते ॥**

**तात्पर्यम्** – उपकारं ये कृतवन्तः तेषां विषये प्रीतिविश्वासादयः यदि दर्श्यन्ते तत्र न कोऽपि विशेषः विद्यते । किन्तु अपकारिणां विषये अपि उत्तमः व्यवहारः यत्र दृश्यते सः भवति वस्तुतः साधुः ।

**उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।**
**पयःपानं भुजङ्गानां केवलं विषवर्धनम् ॥**

**तात्पर्यम्** – सर्पाणां कृते पयः प्रदानेन यथा विषवर्धनं केवलं तथा मूर्खाणां कृते उपदेशः अपि तेषां कोपवर्धनार्थमेव भवति । उपदेशात् ते शान्ताः न भवन्ति । अतः मूर्खेभ्यः उपदेशः अनर्थकः एव स्यात् ।

## ज्ञानसरिता

श्यामः पटेलः

**अस्माकं चलभाषः** – साम्प्रतकाले दूरवाणीं कर्तुं, सन्देशानां प्रेषणाय तथा च मनोरञ्जनार्थं सर्वत्र चलभाषस्य प्रयोगः दृश्यते। अद्य तस्य विषये विशेषं ज्ञातुं प्रयतामहे। संस्कृतजगति चलभाषस्य विभिन्ननामानि उपयुज्यन्ते। तद्यथा जङ्गमदूरवाणी, भ्रमणभाषः, चरदूरध्वनिः इत्यादयः। आधुनिकचलभाषेषु 'नासा' संस्थया चन्द्रं प्रति प्रेषितस्य 'अपोलो-११' नामकस्य उपग्रहस्य सङ्गणकात् अपि अधिका क्षमता अस्ति। अत्यधिकाः जीवाणवः चलभाषस्योपरि भवन्ति। जापानदेशे जनाः स्नानावसरेऽपि चलभाषस्य उपयोगं कुर्वन्ति। अतः तत्रत्याः ९० प्रतिशतं चलभाषाः जलनिरोधकाः भवन्ति। चलभाषेण प्रथमवारं वार्तालापं 'मोटोरोला' संस्थायाः वैज्ञानिकः मार्टिनः कूपरः ख्रिस्ताब्दस्य १९७६ तमे वर्षे कृतवान्। येन केन कारणेन जनाः चलभाषहीनत्वं प्राप्नुवन्ति तदा तेषु कोपः जायते। ते रुष्टाः खिन्नाः च भवन्ति। एषा स्थितिः "नोमोफोलिया" उच्यते। यन्त्रोपकरणेषु चलभाषाणां क्रयणमेव अधिकम् अस्ति। विश्वे शौचालयानाम् अपेक्षया चलभाषाः अधिकाः सन्ति इति बहुभिः मन्यते। चलभाषेण चित्राणि चलनचित्राणि च अधिकानि प्रसारितानि भवन्ति। एषः सम्मर्दः अन्तर्जालीयसम्मर्दे २७ प्रतिशतं स्थानमारक्षति। मलेशियादेशे चलभाषे सन्देशत्वेन उक्तः विवाहविच्छेदः आधिकारिकः अस्ति।

एकस्मिन् सर्वेक्षणे ४७ प्रतिशतं जनाः स्वीकृतवन्तः यत् ते दूरस्थानां सम्बन्धिनां सम्पर्काय एव चलभाषस्य अधिकम् उपयोगं कुर्वन्ति इति तेषां छद्मस्थितिः अस्ति। फिनलेण्डदेशे पुरातनचलभाषेभ्यः पुनः नूतनानां चलभाषाणाम् उत्पादनं भवेत् तदर्थं एका चलभाषविक्षेपणस्पर्धा आयोज्यते। यः स्वचलभाषं दूरातिदूरं क्षेप्तुं समर्थः भवति स एव विजेता भवति।

चलभाषः – mobile phone, सङ्गणकम् – computer, जीवाणुः – bacteria, जलनिरोधकाः – waterproof
सम्मर्दः – traffic, विवाहविच्छेदः – divorce

## शब्दमञ्जूषा

| | |
|---|---|
| **प्रस्तावना** | proposal |
| **पङ्किलजलाशयः** | puddle |
| **दण्डः** | punishment |
| **शिष्यः** | pupil |
| **गुणः** | quality |
| **विवादः** | quarrel |
| **राज्ञी** | queen |
| **कुलम्** | race |
| **दूरश्रवणिका** | radio |
| **जाल्मः** | rascal |
| **संस्तुतीकरणम्** | recommendation |
| **अभिलेखः** | report |
| **प्रत्यागमः** | recovery |
| **विभ्राजमानः** | refulgent |
| **पञ्जीकृतम्** | registered |

## किं भवन्तः जानन्ति ?

**१) प्रयागे कुम्भमेला कस्मिन् मासे आयोज्यते ?**
(क) फाल्गुन (ख) पौष (ग) मार्गशीर्ष (घ) माघ

**२) व्यासपूजा कस्यां तिथौ आचर्यते ?**
(क) आश्विनपूर्णिमायाम् (ख) आश्विनामावस्यायाम्
(ग) आषाढपूर्णिमायाम् (घ) श्रावणपूर्णिमायाम्

**३) अग्नेः सम्बन्धः एतासु कया सह वर्तते ?**
(क) प्रतिपदया (ख) चतुर्थ्या (ग) दशम्या (घ) द्वादश्या

**४) ब्रह्मणः सम्बन्धः कया तिथ्या सह वर्तते ?**
(क) पञ्चम्या (ख) द्वितीयया (ग) तृतीयया (घ) चतुर्थ्या

**५) गणेशस्य सम्बन्धः कया तिथ्या सह अस्ति ?**
(क) तृतीयया (ख) चतुर्थ्या (ग) पञ्चम्या (घ) षष्ठ्या

**६) अनन्तचतुर्दशीपर्व कस्यां तिथौ आचर्यते ?**
(क) भाद्रपदकृष्णचतुर्दश्याम् (ख) आश्विनकृष्णचतुर्दश्याम्
(ग) भाद्रपदशुक्लचतुर्दश्याम् (घ) श्रावणशुक्लचतुर्दश्याम्

उत्तराणि – (१) घ (२) ग (३) क (४) ख (५) ख (६) ग

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First level**

**Date :** 1/12/21 to 28/2/22
**Day :** Mon-Wed-Fri
**Time :** 7:30 am to 9:00 am (IST)
**Fees :** 5000/-

## दिपावलीवर्गः

**Sanskrit Grammer (Cl 9 & 10)**

**Date :** 8/11/21 to 18/11/21
**Day :** Daily
**Time :** 9:00 am to 10:30 am (IST)
**Fees :** 2500/-

**Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237

### संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

- શું તમે સંસ્કૃત બોલવા માંગો છો?
- શું તમે સંસ્કૃત ભાષાનાં ઉત્તમ શિક્ષક બનવા માંગો છો ?
- શું તમે સંસ્કૃતને સંસ્કૃત માધ્યમમાં ભણાવવા માંગો છો ?
- શું તમે સંસ્કૃતક્ષેત્રે ઉત્તમ કારકિર્દી બનાવવા માંગો છો ?

તો અહીં છે, એક તક એકલવ્ય સંસ્કૃત એકેડેમી દ્વારા આયોજીત

# "Diploma In Sanskrit Teaching"

**શ્રીસોમનાથ સંસ્કૃત યુનિવર્સિટી માન્ય કોર્ષમાં**
ભાગ લો અને ઉત્તમ શિક્ષક બનો.

- કોઈપણ પ્રવાહમાં ધોરણ ૧૨ પાસ, પ્રવેશને યોગ્ય.
- મર્યાદિત ૨૫ બેઠકો.
- પ્રવેશપત્ર કોરહાઉસ, ઓફ. સી જી રોડ ખાતે ઉપલબ્ધ.

**અભ્યાસક્રમની વિશેષતાઃ**

→ તાલીમ માટેનું ગુણવત્તાયુકત વાતાવરણ.
→ પ્રત્યક્ષપદ્ધતિ દ્વારા શિક્ષણ.
→ અનુભવી શિક્ષકો દ્વારા શિક્ષણ.
→ શ્રેષ્ઠ તાલીમાર્થીઓ માટે નોકરીની ઉત્તમ તક.

વધુ માહિતી માટે સંપર્ક કરોઃ ડૉ. મિહિર ઉપાધ્યાય **9824616237**

**प्रियवाचकाः**
- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006